Bhaktikatha.com

॥ রামাষ্টকম্ ॥

ভজে বিশেষসুন্দরং সমস্তপাপখণ্ডনম্ । স্বভক্তচিত্তরঞ্জনং সদৈব রামমদ্বয়ম্ ॥ ১ ॥

জটাকলাপশোভিতং সমস্তপাপনাশকম্ । স্বভক্তভীতিভঙ্জনং ভজে হ রামমদ্বয়ম্ ॥ ২ ॥

নিজস্বরূপবোধকং কৃপাকরং ভবাপহম্ । সমং শিবং নিরঞ্জনং ভজে হ রামমদ্বয়ম্ ॥ ৩ ॥

সহপ্রপঞ্চকল্পিতং হ্যনামরূপবাস্তবম্ । নিরাকৃতিং নিরাময়ং ভজে হ রামমদ্বয়ম্ ॥ ৪ ॥

নিষ্প্রপঞ্চনির্বিকল্পনির্মলং নিরাময়ম্ ॥ চিদেকরূপসন্ততং ভজে হ রামমদ্বয়ম্ ॥ ৫ ॥

ভবাব্ধিপোতরূপকং হ্যশেষদেহকল্পিতম্ । গুণাকরং কৃপাকরং ভজে হ রামমদ্বয়ম্ ॥ ৬ ॥

মহাবাক্যবোধকৈর্বিরাজমনবাক্পদৈঃ । পরব্রহ্ম ব্যাপকং ভজে হ রামমদ্বয়ম্ ॥ ৭ ॥

শিবপ্রদং সুখপ্রদং ভবচ্ছিদং ভ্রমাপহম্ । বিরাজমানদৈশিকং ভজে হ রামমদ্বয়ম্ ॥ ৮ ॥

রামাষ্টকং পঠতি য়ঃ সুকরং সুপুণ্যং ব্যাসেন ভাষিতমিদং শৃণুতে মনুষ্যঃ ।

বিদ্যাং শ্রিয়ং বিপুলসৌখ্যমনন্তকীর্তিং সম্প্রাপ্য দেহবিলয়ে লভতে চ মোক্ষম্ ॥ ৯ ॥

॥ ইতি শ্রীব্যাসবিরচিতং রামাষ্টকং সম্পূর্ণম্ ॥

Bhaktikatha.com